Author:- —
Title:- —
Sanskrit
Paper - Handwritten
Very old
Only 4 folios available
14.8" x 4.8"
Incomplete

श्रीगणेशाय नमः ॥ तच्चानुमानं परार्थं न्यायसाध्यमिति न्यायस्तदवयवाश्च प्रतिज्ञाहेतूदाहरणोपनयनिगमनानि निरूप्यन्ते ॥ तत्र समस्तरूपोपपन्नलिङ्गप्रतिपाद
कवाक्यं न्यायः । अत्रैव वाक्ये ऽतिव्याप्तेः । किं तु अनुमितिचरमकारणलिङ्गपरामर्शप्रयोजकशाब्दज्ञानजनकवाक्यं न्यायः । प्रतिज्ञादिपञ्चवाक्यैरेकवाक्य
तया स्वार्थविशिष्टज्ञानं जन्यते तेन च विशिष्टवैशिष्ट्यावगाहि मानान्तरम् उत्पाद्यते तेन च परामर्श उत्पाद्यत इति न्यायजन्यशाब्दज्ञानस्य परामर्शप्रयोजक (मानं च ज्ञान करणं)
ता ॥ अनुमितिचरमकारणलिङ्गपरामर्शप्रयोजकशाब्दज्ञानजनकशाब्दज्ञानजनकवाक्यत्वं अवयवत्वं ॥ अत एव वह्निव्याप्यधूमवानिति वाक्ये तदवय
वे च न न्यायतदवयवलक्षणातिव्याप्तिः । तेन परामर्शस्य तदवयवेन च परामर्शजनकस्य जननात् । यत्तु संक्षेपतः परामर्शप्रयोजकवाक्यत्वे नाविशेषा
(१ तन्न) ज्ञावास्तोऽपि न्याय एवेति ॥ कथायामाकाङ्क्षाभिधानमिति । प्रथमं विशिष्टवैशिष्ट्यस्याकाङ्क्षा नास्तीति तदभिधाने निग्रहादि निवक्ष्यते । अन्यथा चाकुरादेरपि (आ)
(१ क्रमेण) परामर्शप्रयोजकतया न्यायत्वापत्तेः । आकाङ्क्षाविरहस्तुल्य एव ॥ अन्ये तु पञ्चावयववाक्याद्विजातीयमेव शाब्दज्ञानमुत्पाद्यत इति तज्जनकवाक्यत्वं न्यायत्वं (द्वी)
(तेन) एवं प्रतिज्ञाद्यवयवादेरपि प्रत्येकं विजातीयशाब्दज्ञानमिति तज्जनकशाब्दत्वमेव लक्षणमिति तन्न ज्ञानविशेषजनकत्वं न्याये प्रतिज्ञादौ च नातीति (तत्तदज्ञान)
(द्वी) मनुगतरूपमन्तरेण दुर्निरूपं तत्स्वीकारे तस्यैव लक्षणत्वात् । अन्यथा जातिसंकरप्रसंगात् ॥ प्रतिज्ञा न साध्यनिर्देशः साध्यपदेऽतिव्याप्त्यापत्तेः किन्तु देशानुमि (जनकत्वं वा)
१प्रस

नेः श्चाब्द

॥चिंतामणि चरमकारणलिंगपरामर्शप्रयोजकवाक्यार्थज्ञानजनकत्वे सत्युद्देश्यानुमितित्रित्वन्यूनानतिरिक्तविषयकज्ञानजनकवाक्यं। अन्यूनानतिरिक्तपदं विहाय लिंग

१ विषयकत्वं ज्ञाने विशेषणं देयं। तेनोदाहरणादिव्युदासः। निगमनं च न परामर्शहेतुः अबाधितासत्प्रतिपक्षितत्वज्ञानजनकत्वात्। इत्थं निगमनप्रयोजकजिज्ञा ।

विषयीसाजनकवाक्यत्वं वा लिंगाविषयकलिंगीज्ञानपरवाक्यत्वं वा इतरावयवानां (ही) विषयकज्ञानजनकत्वात् प्रतिज्ञात्वं जातिरनुगतानतिप्रसक्तानैकव्यवहा जनकन्यायाव यववाक्यं

दितिकेचित्तन्न। देवदत्तत्वप्रज्ञावत्त्वादिना जातिसंकरप्रसंगात् प्रतिज्ञार्थयत्नजन्यं विजातीयज्ञानं व्यवहारादिति ज्ञानजनकं वाक्यं त्वं ज्ञेयं (तत्त्वामि) त्वं वा

ना व्यापिना। तदुद्देशज्ञाने जनकत्वं तदुद्देशज्ञाने जनकज्ञानं वानुगतरूपं मतरेणा...नुसरणीयत्वात्॥ इति चिंतामणेः॥ ॥अथ न्यायेरामाणिः॥ अथ चिंतानुपूर्वी प्रति

कं प्रतिज्ञादिपंचकसमुदायत्वं न्यायत्वं प्रतिज्ञात्वं पुनरुदासीनवाक्यवारकन्यायान्तर्गतत्वशून्यमेवोपादेयमिति नान्या न्यायः साध्यादिविशेषनियं

३ दिकं चैतावत् प्रतिज्ञादयोवयवा इति विशिष्ट साध्यादिकप्रतिज्ञादिसमुदायेऽ...व्याप्तिः। न्यायादेरिव साध्यस्याननुगमाद् अननुगमे न्यायादेरपीष्यते ए

व। एतेन प्रतिज्ञानिगमनयोरुदाहरणावयवान्तरयोश्च न संज्ञैकार्थप्रतिपादकत्वं प्रागेवत्तु पंचानामवयवानां। परं तु प्रतिज्ञाहेत्वोः कथंचिदुपनय

पन संभवतीत्यन्यस्या

निगमनयोरेकैकवाक्यताव्यवहारस्तु विशिष्टैकार्थप्रतिपत्तिपरतामात्रेण तादृशपरामर्शप्रयोजकत्वं च यद्यपि तद्विषयप्रतत्यक्षर्थसार्थोपस्थापकतया तदोदा-
हरणोपनययोरेव तत्सत्त्वं स्यात्। अथ तदनुकूलत्वमात्रेण तदाकांक्षा वह्निमान् पर्वतो वह्निमान् कुतो धूमवत्त्वादित्यादयोरपि न स्यात्त्वमित्यादिकं समाहितं
।। अवयवत्वं तु न्यायपर्याप्तमतिवेसति प्रतिज्ञाद्यन्यतमत्वं। प्रतिज्ञायघटकत्वे सति उक्तायघटकत्वाकांक्षया घटितत्वं वाक्यत्वं उक्तायं च प्रतिज्ञाहेतूदाहरणोप-
नि हरणोपनयावृपनयनिगमने इति विशिष्य वक्ष्यामि। प्रतिज्ञादि प्रतिपाद्य तत्तद्विशिष्टार्थविषयकज्ञानपंचकान्यतमज्ञानजनकवाक्यत्वं तत्त्वमित्य-
पि केचित्। तन्नैवेति तच्चतादृशजातौ साधकाभाववदितिभावः। साधकमप्याह अन्ययत्वेति न्यायजन्यज्ञाने पंचावयवत्वात् पंचविद्याद्दि जन्यवृत्त्या जन्य-
इ वृत्त्या एकैकजन्यत्वे चैकैकजातयति संकर इत्यार्थः। तत्र तत्र जिज्ञासितज्ञातिकल्पने सुतरां मानाभावादिति भावः। केचित्तु अनुगतं कारणं तरेणापि। यदि च
तादृशजातिमत्त्वसंभवस्तदा कदापि न प्रतिज्ञादिजन्येऽपि हेत्वादिजन्यवृत्तिर्हेत्वादिजन्ये च प्रतिज्ञादिजन्यवृत्तिजातिः स्यादिति। संकर इत्यर्थः। एवं सर्वे-
षां सर्वजातीयत्वमेकजातीयत्वं वा स्यादित्यपि द्रष्टव्यमित्याहुः। साध्यनिर्देशः प्रतिज्ञेति सुत्रं साध्यो विधेयश्च मि विशिष्टधर्मी तच्चार्थ पक्षतावच्छेदकपर्वतत्वादि-
विशिष्टे साध्यतावच्छेदकवह्नित्वादिविशिष्टवैशिष्ट्यजनकोऽन्यामावयव इति पर्यवसितोऽर्थः। उदाहरणं च साध्यतावच्छेदकविशिष्टज्ञानं न पक्षतावच्छेद-

शी॰ कविशिष्टे उपनयस्य पक्षतावच्छेदकविशिष्टे साध्यतावच्छेदकविशिष्टवैशिष्ट्यज्ञानमितितयेर्थ्यं द्रासः। किंत्वित्यादिना प्रकृतन्यायबहिर्भूतवाक्यवारणाय संयतं प्र-
२ कृतन्यायावयवत्वपर्याप्तितार्थं किं उद्देश्येति प्रकृते त्यर्थः। वन्हिसाध्यकन्यायप्रयोजनयस्य वन्हिव्याप्यधूमसाध्यकानुमित्यन्यूनानतिरिक्तविषयकज्ञानजनकस्य वारणा-
य प्रकृतद्वयं। तथाच यादृशसाध्यपक्षकन्यायावयवत्वं तादृशसाध्यपक्षकानुमित्यन्यूनानतिरिक्तविषयकशाब्दज्ञानजनकत्वं पर्य्यवसितार्थः। धूमादालोकवान्
पर्वतो वन्हिमान् धूमादित्यादेरन्यूनातिरिक्तविषयकज्ञानजनकस्य हेतोर्वारणाय अन्यूनेति। निगमनवारणाय अनतिरिक्तेति। यद्यपि निगमने साध्यपक्षवाचकप-
दं न श्रूयते तथापि न्यूनताकांक्षायोपनयस्याप्यस्मादिपदस्य अनुषंगात्तथा बोध्यं इत्थं मेवच प्रसक्तामतिप्रसक्तिं निगमनं चेत्यादिना निराकरिष्यतीति तदर्थः। निगम-
नमन्यूनानतिरिक्तविषयकज्ञानजनकं सन्न परामर्शहेतुर्येन निरुक्तन्यायावयवत्वरूपं प्रतिज्ञात्वं व्याप्नुयात् अबाधितत्वादेस्तद्बोधौपयिकविशिष्टहेतुसंबंधस्य
वा बोधकतया तस्यातिरिक्तविषयकज्ञानजनकत्वादिति। यत्तु पृथिवीइतरेभ्यो भिद्यते पृथिवीत्वादित्यादितो यत्र पृथिवीतरेभ्यो भिद्यते न ततः पृथिवीत्युदाहरणवार-
णाय तदिति तन्न तेन पृथिवीतरभेदस्याविषयीकरणात् तात्पर्य्यभ्रमेण तादृशबोधकजनकत्वस्यातिप्रसक्तत्वात् न च तावतान्युदाहरणस्य तथात्वसंभवायनेत्या-
देरनन्वयात् यदिच निगमने न्यायमात्रपदं निवेश्य तेवाक्यैकवाक्यतयैव विशिष्टलाभादिति विभाव्यते तदा हेतोः साध्यसामानाधिकरण्यज्ञाने सामान्यतः पक्षे

क्षे साध्यवत्त्वज्ञानात् पक्षे हेतुव्यापकसाध्यसामानाधिकरण्यविशिष्टहेतुमत्ताबोधकस्योपनयस्य यत्र च पक्षसाध्ययोः साध्यरूपेण दृष्टान्तत्वहेतुत्वाभ्यामुपन्यासात्तादृश
सिषाधयिषा च न्यायप्रयोगस्तत्रोदाहरणोपनययोर्यच्च वा पर्वतत्वाद्यवच्छेदेन साध्यसिद्धेरुद्देश्यतायामेतत्पर्वतत्वादिना दृष्टान्तस्योपन्यासात्तत्रोदाहरणस्य महानसस्य
चावयवघटकत्वायांगमतित्वपरतया हेतुत्वं तदुक्तस्यापि यमादीनि गमनानि तन्नामस्य कारणायततापद्यपि सर्वमूनि धेयं प्रमेयत्वादावतिरिक्तप्रसिद्धेर्नन्वेकोद्यप्र
सिद्ध्या प्रमेयमंनवेति विप्रतिपत्तेः संशयस्य चायोगात् ननानादृशी प्रतिज्ञा प्रकृतानुमितिविषयतासमव्याप्यावेदनाकत्वं प्रकृतानुमितिप्रकारतासमव्याप्यप्रकारताक पक्ष
त्ववावत्कत्वं मितिवाच्यं सकलाभिधेयवृत्तिधर्मवत् सकलाभिधेयनिष्ठात्यन्ताभावप्रतियोग्याकाशाभाववदिदं द्रव्यमित्यादिविशिष्टबोधके उपनयेऽतिव्याप्त्यापत्तेः
तथापि प्रकृतपक्षे प्रकृतसाध्यवैशिष्ट्यविषयत्वं तदन्यूनविषयत्वं। प्रकृतपंचम्यर्थपक्षकप्रतिज्ञादिस्थले तु पक्षे प्रकृतार्थस्य वैशिष्ट्यबोधके हेतुर्न तु प्रकृतसाध्यस्य
तादृशविषयताविलक्षणविषयतानुन्यूनत्वं प्रकृतहेतुकप्रकृतसाध्यसिद्धौपयिकव्याप्तिविषयकत्वं वा तदनतिरिक्तविषयत्वं वह्निव्याप्यालोकवत्त्वसधर्मा पर्वतो वह्नि
मान् धूमादित्यत्र व्याप्यधूमवान् पर्वतो वह्निमान् धूमादित्यादौ तस्याः संगृहीतप्रकृतहेतुसाध्ययोपादानं। वह्निव्याप्यधूमवान् पर्वतो वह्निमान् धूमात् सत्तादि
व्याप्यद्रव्यत्ववदिदं सत्तावद्द्रव्यत्वादित्यादिन्यायप्रयोगः। विशिष्टपक्षोपक्ष्यापकत्वादेव तादृशव्याप्तिप्रतीताववाक्ष्यावृत्तिरहेणोदाहरणानुत्थानात्तज्जन्यत्वा
न्या ऽतिप्रसंगात् अत एव नैकदेशे न्यायत्वाद्युपपत्तेः अपि। यदि च मैत्रः पचति जयं गौरित्यादेरेव प्रतिज्ञायाः पञ्चोपवर्णितविशिष्टज्ञानजनकत्वं तदा स्येन गोः

त्रिरे. साध्यत्वात्गोत्वव्याद्यनुपस्थित्यागोत्वादेःसाध्यत्वानुपपत्तेः पदार्थतावच्छेदकजातौ हि त्वर्थान्वयायोगाच्च वह्निमानित्यादौ पुनरनुमितौ पक्षे साध्यस्य वह्नेः सं
२ योगात्मकः संबंधो भासते तथैव वह्निव्याप्यधूमवानित्यादावुपनयग्रसंगमात्त्वाच्छाब्दज्ञाने तु वह्निमतोऽभेदः एवं भेदे साध्ये त्वौचित्ये भिन्नमित्यादप्यपि वैलक्षण्यमिति
सूक्ष्ममीक्षते जदा यादृश पक्षसादिका पक्षे यादृशया दृश विशिष्टार्थबोधकप्रतिज्ञाः संप्रदायप्रसिद्धाः तादृशज्ञानानां बोधानामन्यतमेनाप्यनिवर्त्यस्य संशयस्यानि
वर्तकोप्यस्तावदबोधानामन्यतमो वैद्युत्तजनकत्वं नतन्मं एवं च तादात्म्येन मतिसाध्ये पक्षे गवा भेदस्य संयोगेन समवायेन वा वह्निवान्हिमद भेदस्य समवाये
न पाकस्य कृतौ पाककृतिमत्वस्य पाककर्तृभेदस्यादिवृत्तेषण तयेतरेभ्यो भेदे दृढतरभेदवत्ववत्त्वस्येतरान्याभेदस्येतरभेदवत्त्वस्येतराभेदस्य च बोधापि
त्सिष्षावतकव्यादृपीदिक तावदबोधानिवर्त्य संशयानिवर्तकतावदबोधनिवर्त्ययावत्संशयानिवर्तकबोधजनकत्वं वाच्यमित्यपि काश्चित् त्वैव च पचानीय
टोनेतरणीतिप्रतिज्ञायां मध्ये विषयित्वानुयोगित्वयोः संबंधविधयैवानुप्रवेशाद्यथोपदर्शितसाध्यगमकतौपयिकव्याप्तिविशिष्टहेतुमत्त्वस्य च पक्षेउपने
यत्वात् तथा चायमित्याकारः स्वव च एव प्राचामुपनयः नव्यानां पुनरन्यगतिकतया तद्व्याप्यहेतुमांश्चायमित्याकारक यो व्याप्तावद्वसाध्यतन्मध्ये साध्यस्यानद
व्याप्यस्य वा परामर्शः केचित्तु वह्निमान्नवेति विप्रतिपत्तौ तद्धीनसंशये च वह्निमत्तद्योन्याभावविषयाया तादात्म्ये विशेषणताया योः कोटित्वेनाजिज्ञासितत्वात्
नादात्म्येन वह्निमानेव साध्यमिति तु मुचितोऽननु वह्निः आजिज्ञासितत्वात् न चायं च न चाचायमित्याकारो वह्निमद्व्याप्यधूमवांश्चायमित्याकारो वा उपनयो

नन्वह्निव्याप्यधूमवानयमित्याकारोऽनुमितिरित्यादिति प्राहुः यत्र चानुमानात् हृद्ग्रबोधेन जातस्य चायमित्याकांक्षायोग्यतादिसत्त्वे तद्रूपं तज्जननयोग्यत्वमक्षतं
तल्लाभश्च जातिविशेषोवस्थापकशब्दवाक्यशब्दयोरूपसंदानादेवेति अन्यूनेत्यादि तथाचोक्तं दृष्टान्तामितिसमानविषयकलिंगादिविषयकशाब्दज्ञानजनकन्या
यावयवत्वमर्थः व्यतिरेकिणि हृदो निर्धूम इत्यादि निर्वह्नित्वहेतुके यथा हृद इति ल मित्यादि दृष्टान्तवतो हृदावृत्तिधर्मशून्यत्वादिहेतुके वोदाहरणस्य वार
णाय समानविषयकत्वं पक्षविशेष्यकार्थकोपनयवारणाय लिंगाविषयकेति। यद्यपि प्रकृतलिंगाविषयत्वं पृथिवीइतरेभ्यो भिद्यते पृथिवीत्वात् गंध
वती तथा गंधवादित्यादावव्यापकं न च तत्रोपनयासंभवः इदमागंधवत्त्वेन परामृष्टहेतुनू तगंधवत्वान्वयायोग्यात् इति वाच्यं। साध्याभावव्यापकगंधा
भावाभाववत्त्वेनान्वयात् अत एव व्यतिरेकिणि न चायं पृथिवीत्यादिकः प्राचांप्रयोगः यदि च दंडवान् रक्तदंडवानित्यस्यान्वयेनानुपपन्नस्तद्विशिष्ट
बुद्धत द्विशिष्टस्य चयस्यैव नान्युत्पन्नत्वादित्युपेयते तदा नानुपपत्तिः गंधोऽपि पक्षाविशेषणत्वेन तद्विषयत्वं चायं वह्निमान्वन्हेरित्यादौ प
क्षाविशेषणत्वेन साध्याविशेषणत्वेन च तद्विषयत्वं दृष्टिदृष्टं दृष्टः प्रमेयत्वं माभिधेयं प्रमेयत्वात् गोत्वाभाववान् समादिमान् गोत्वाभाववादित्यादाव
व्यापकमतिव्यापकं चोपनयस्य तथापि पक्षतावच्छेदकविशिष्टपक्षे यत्साध्यतावच्छेदकविशिष्टसाध्यवैशिष्ट्यावगाहित्वं तद्वृहिभावेन लिंगाविषय
त्वस्याभावो वाच्यः वस्तुतो लिंगं लिंगत्वं तथा च प्रकृतहेतुतावच्छेदकावच्छिन्नस्य प्रकृतसाध्यतावच्छेदकावच्छिन्नगमकतोपयिकपक्षमात्रविषः

निरे। यत्त्वं तच्छून्यत्वमर्थः नच हेतौ साध्यव्याप्यतावगाहित्वं हेतुभूताभावप्रतियोगितावच्छेदकावच्छिन्ने साध्याभावव्यापकतावगाहित्वं च द्रव्यत्वव्याप्यसंयोगवद्वृत्ति
४। धर्मवान्नयं द्रव्यत्ववान् गुणात् गुणव्याप्यरूपवान्नयं स्पर्शवान् रूपादित्यादौ प्रतिज्ञासंग्रहायावच्छेदकद्वयोपादानं अन्यूनानतिरिक्तपदाभिति च मूलमुद्दे
श्यानुमित्यन्यूनानतिरिक्तविषयत्वागपरं हेतुत्वमाकांक्षेयं पञ्चमेयमत्वादित्यादौ पंचम्यर्थपरिच्छेदकहेतुवारणाय पंचम्यंतान्यत्वस्य हेत्वन्यत्वस्य वा सं वाच्य
त्वात् संख्यातिरिक्तसुबर्थस्य प्रातिपदिकार्थे विशेष्यत्वेनैवान्वयात् प्रातिपदिकार्थयोः क्रियाप्रातिपदिकार्थयोश्चाभेदेन साक्षात् अन्वयस्याव्युत्पत्ते
वक्ष्यमाणत्वात् चैत्रस्येदं न मैत्रस्य मैत्रस्येदं न चैत्रस्य द्वयोरिदं नैकस्यापीत्यादौ चैत्रादिसंबंधाभावबोधस्य विना विभक्त्यर्थविशेष्यतामनुपपत्तेः
चैत्रो न पचतीत्यादौ तिङर्थस्येव विनाप्यनुयोगिनि सप्तमीं सुबर्थस्याप्यभावान्वयात् हेतुनिष्ठपकज्ञानजनकत्वव्याख्यानयत्तावच्छेदकरूपशून्यत्वे सत्युदा
हरणान्यन्यायावयवत्वं तत्त्वं तादृशं चावच्छेदकं हेतुत्वादिकमिति केचित्॥ हेतुत्वाभिधानेति जिज्ञासाजनकत्वं तच्चोपनयतावच्छेदकत्वं न्यायावयवत्वं॥ लिंगेत्यादि लिंगा
विषयेति पूर्वापरदर्शितार्थकं अन्नावहेतुकव्यतिरेक्युदाहरणवारणाय लिंगीत्युक्ति। लिंगी साध्यं तद्विषयकं तद्विशेष्यकं तेनेदं जलं निस्नेहत्वप्रकारकप्रमाविष
यत्वाभावान्यत्वात् इदं द्रव्यं जलान्यत्वप्रकारकप्रमाविषयत्वभूत्वादित्यादौ यज्जलं तन्निःस्नेहत्वप्रकारकप्रमाविषयइत्याद्युदाहरणे नातिप्रसंगः। लिंगाविषये
त्वस्य पूर्वोक्तव्याप्यत्वाविषमतार्थकत्वे हेतुवारणाय लिंगीति। लिंगीविषयत्वं च प्रकृतहेतुतावच्छेदकावच्छिन्नहेतुविशेष्यहेतुत्वविषयतावच्छिन्नाभावेन वाच्यं तेन वह्निमा
न् वह्निसामग्रीमत्त्वात् यं हेतुरिदं वा हेतुत्वं तत्त्वेन प्रतीयमानत्वादित्यादौ हेतौ नातिप्रसंगः। लिंगविषयकज्ञानजनकत्वानियतलिंगीविषयकज्ञानजनकत्वानि